Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 6 | ISSN : 2582-0095

# पाठ्यचर्यायाः समस्याः

जयपालः
शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली



**Article Info**
Volume 4 Issue 6
Page Number: 88-91

**Publication Issue :**
November-December-2021

**Article History**
Accepted : 01 Dec 2021
Published : 25 Dec 2021

**शोधसारांशः**

पाठ्यचर्या छात्राणां ज्ञानवर्धनार्थं नियोजितानां सर्वासां दशानां, ताभिः सम्बद्धकारकाणां सैद्धान्तिकाधारः व्यावहारिकाधारश्च प्रस्तौति। तस्यां ये अनुभवाः समादृयन्ते, तेषामनुप्रयोगः विद्यालये शिक्षायाः लक्ष्यानां प्राप्त्यर्थं प्रयुज्यते। पाठ्यवस्तुनाऽपेक्षया पाठ्यक्रमः एवञ्च पाठ्यक्रमापेक्षया पाठ्यचर्या विस्तृता भवति। अस्याः पाठ्यचर्यायाः याः समस्याः वत्रमाने दृश्यमानाः सन्ति। तासां विषये शोधलेखोऽयमुपयुक्त इति कथयितुं शक्यते।

मानवविकासस्य यानि साधनानि अर्वाचीनेऽस्मिन् काले विद्यमानानि सन्ति, तेषु साधनेषु शिक्षाऽन्यतमां वर्ततेति सर्वैः स्वीक्रियन्ते। अस्याः याः प्रक्रियाः सन्ति ताः सर्वाः प्रक्रियाः गत्यात्मिकाः निरन्तराश्च वर्तन्ते। अस्यां खलु प्रक्रियायां देशकालस्यानुगुणं कालक्रमेण यदा-कदा अध्यापकेषु छात्रेषु विषयवस्तुषु वा शिक्षणोद्देश्येषु महत्त्वं प्रदीयते।

---

अर्वाचीनेऽस्मिन् काले व्यक्तौ समाजे एवञ्च राष्ट्रेऽवधानं प्रदाय शिक्षोद्देश्येषु सर्वाङ्गीणविकासेन सह कौशलानामुन्नयनस्य दृष्ट्या, तेषु कौशलानामुन्नतिः विकासश्च महत्त्वपूर्णं वरीवर्ति। उद्देश्यां सर्वथा साध्यमेवञ्च तस्य प्राप्तये यानि साधनानि प्राच्यैः पाश्चात्यैश्च निगदितानि तेषु एडमस मते अध्यापकः छात्रश्चेति द्वयं प्रमुखमस्ति। तत्रैव जॉन ड्यूवी मते अध्यापकः छात्रः पाठ्यक्रमः, पाठ्यचर्या वा समानो भवति। भारतीयमनीषायां तत्र उपनिषदि निगदितमस्ति यत् आचार्यः पूर्वरूपमन्तेवासीः उत्तररूपं विद्यासन्धिः प्रवचनं सन्धानमिति। अस्मिन् आचार्यः छात्रः विद्या (पाठ्यचर्या) प्रवचनमिति विधिविशेषः इत्येतानि चत्वारि प्रमुखतमानि साधनानि स्वीकृतानि सन्ति। वस्तुतस्तु शिक्षाप्रक्रिया सार्थकतां प्रति गच्छेदेतदर्थं साध्य-साधनयोर्मध्ये परस्परं समन्वयनमत्यन्तमपेक्षितं भवति। अस्यां खलु प्रक्रियायां छात्रः मानवः व व्यक्तिविशेषः कौशलत्वेन वा ज्ञानत्वेन साध्यं भवति। तस्य व्यवहारे परिमार्जनं परिवर्तनमनुकूलदिशाप्रदानञ्च अनेकैः साधनः क्रियते। तस्य विभाजनं वर्गत्रये तत्र औपचारिकानौपचारिकनिरौपचारिकत्वेन च क्रियते।

औपचारिकान्तर्गते यानि साधनानि समागतानि भवन्ति तेषां नियोजनं निश्चितोद्देश्यानां पूर्तये व्यवस्थितत्वेन प्रयोगः संस्थासु क्रियते। यस्य नामोच्चारणं विद्यालयत्वेनाभिधीयते। औपचारिकी या शिक्षा विद्यालये छात्रेभ्यः प्रदीयते तस्याः नूनमेव शिक्षोद्देश्यानि निर्धारितानि भवन्ति। अस्याः तिस्रः प्रक्रियाः जॉन ड्यूवी महोदयेन निगदिताः। तद्यथा -

- उद्देश्यनिर्धारणम् (Determination of Aims)
- शिक्षणपद्धतयः (Teaching Method)
- पाठ्यचर्या (Curriculum)

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

प्रो. हार्न महोदयस्य मते शिक्षाप्रक्रियायै तत्त्वचतुष्टयमावश्यकमिति। तानि च निम्नलिखितानि भवन्ति।

1- शिक्षकः
2- छात्रः
3- पाठ्यचर्या
4- शैक्षिकवातावरणञ्चेति

भारतीये मनीषायां चतस्रः प्रक्रियाः निगदिताः सन्ति। तद्यथा -

1- आचार्यः (अध्यापकः) Teacher
2- अन्तेवासी (छात्रः) Student
3- विद्या (पाठ्यचर्या) Curriculum
4- प्रवचनम् (विधिः) Method

वस्तुतस्तूक्तानां प्रक्रियाणां सर्वेषामर्वाचीनेऽस्मिन् काले समाहारः पाठ्यचर्यायां भवति। अनया एव इदानीन्तनीये काले शिक्षायाः उद्देश्यानि प्राप्तुं शक्यन्ते। अस्याः पाठ्यचर्यायाः विस्तरं ज्ञानं शिक्षकेभ्यः नीतिनिर्धारकेभ्यश्च अपेक्षितं भवति।

पाठ्यचर्या इत्यस्य कृते आंग्लभाषायां Curriculum इति शब्दविशेषः प्रयुज्यते। अस्योत्पत्तिः लैटिनभाषायाः Currier इत्यनेन शब्देन अभवत्। यस्यार्थो भवति धावनक्षेत्रमिति। वस्तुतस्तु शिक्षा एकं धावनक्षेत्रमिवास्ति, यं पारयित्वा कोऽपि छात्रः स्वगन्तव्यं प्राप्तुं शक्यते। शाब्दिकार्थे पाठ्यचर्या तन्मार्गोऽस्ति यस्यानुसरणं कृत्वा छात्रः शिक्षायाः लक्ष्यमवाप्तुं सफलो भवति। अत्रपि एषा शिक्षायाः लक्ष्यमवाप्तुं एकं साधनमिति ध्वन्यते।

व्यापकार्थे अस्यान्तर्गते तेषां सर्वेषामनुभवानां समावेशो भवन्ति यैः बालकस्य सर्वाङ्गीणविकासाय आभ्यन्तरवस्थाभ्यां सर्वे विषयाः क्रियाश्च समादृताः भवन्ति। तत्रैव संकुचितार्थे अस्याः सम्बन्धः पाठ्यक्रमेण वा पाठ्यवस्तुना सह वर्तते। यस्यां केवलं केचन विषयाः स्वतथ्यसीमासु निश्चितं भवति। मुनरो मते पाठ्यचर्यायां ते सर्वे शैक्षिकानुभवाः समादृताः भवन्ति यस्यानुप्रयोगं शिक्षोद्देश्यस्य प्राप्त्यर्थं क्रियते। वस्तुतस्तु अस्याः अर्थं स्पष्टयितुं दार्शनिकाः समाजशास्त्रिणः मनोवैज्ञानिकाश्च यत्नं कृतवन्तः। समाजशास्त्रिणाः पाठ्यचर्यायाः विस्तरमर्थं स्पष्टयन्ति। तेषां मते पाठ्यचर्यायाः सम्बन्धः ताभिः सर्वैः क्रियाभिः दशाभिस्सह वर्तन्ते येषां नियोजनं सम्पादनञ्च विद्यालयेन क्रियते। देशकालदशानुगुणं अस्याः नियोजने प्रारूपे च परिवर्तनं परिमार्जनं च जायते। तदेव पाठ्यचर्याऽर्थोऽपि परिदृश्यते प्राचीनकाले पाठ्यचर्यार्थः संकुचितः आसीत्। केषुचित् विषयेषु शिक्षायाः प्रारूपमेव पाठ्यचर्या नाम्नाऽभिधीयते स्म। परं साम्प्रतिके काले अस्यार्थः व्यापकोऽस्ति। अस्याः स्वरूपं ज्ञानं यावदेव संकुचितं नास्ति अपितु बालकः भावीजीवनाय सक्षमः भवेत्तावती पाठ्यचर्या भवितव्या। वस्तुतस्तु पाठ्यचर्यायं ते सर्वे विषयाः सम्मानेन योजयन्ते यैः बालकानां पितृणां शिक्षकाणां सामाजिकानाञ्च जीवनमग्रेसरति। अस्याः निर्माणं तैः विषयैः योजनाभिश्च क्रियन्ते, यैः अधिगन्तुः कार्याणां निबन्धनं होरासु भवेदेवञ्च वातावरणेन सह सहयोगात्मकं सामञ्जस्यं स्थापयेत्। विषयेऽस्मिन् माध्यमिकशिक्षाऽयोगः कथयति यत् पाठ्यचर्यायाः अर्थः रूढ़िवादीरीत्या पाठ्यमानैः बौद्धिकविषयैस्सह नास्ति अपितु तस्यान्तर्गते ते सर्वे विषयाः क्रियाश्च समादृयन्ते येषां प्राप्तिः बालकः कक्षान्ते बाह्ये च करोति। वस्तुतस्तु अस्याः प्रकृतौ छात्रणां ज्ञानवर्द्धनार्थं नियोजिताः ताः सर्वाः क्रियाः एवञ्च तेषां सम्बद्धकारकाणां सैद्धान्तिकाधारं व्यावहारिकाधारं च प्रस्तौति।

भारतीयशिक्षायां प्रवर्तमानायाः प्रचलितायाः पाठ्यचर्यायाः निर्माणं ब्रिटिशकालीनशिक्षोद्देश्यस्य प्राप्तये कृतमस्ति। फलतः अस्याः अन्तग्रते तादृशानां तेषां सर्वेषां क्रिया-विचार-अनुभव-विषयाणाञ्च अभावोऽस्ति। यैः स्वतन्त्रभारतस्य बालकाः यशस्विनो तेजस्विनो च भूत्वा सभ्यनागरिको ग्रामीणश्च भवेत्। अनेनैव कारणेन इमां भारतीयां पाठ्यचर्यां शिक्षाविज्ञाः शिक्षकाः बालकाः अभिभावकाश्च प्रायशः सर्वे निन्दन्ति। इदानीन्तनीये काले प्रवर्तमानायाः पाठ्यचर्यायाः काश्चन निम्नलिखिताः समस्याः परिदृश्यमानाः भवन्ति। तद्यथा -

1- संकुचिताधारः - अर्वाचीनेऽस्मिन् काले सर्वत्र माध्यमिकशिक्षायै प्रवर्तमाना पाठ्यचर्या बालकस्य मनोवैज्ञानिकवैशिष्ट्यम्, क्षमतां सामाजिकावश्यकताञ्च प्रत्युपेक्षाभावं प्रदर्शयति। वस्तुतस्तु इदनीमपि शिक्षायः ज्ञानात्मके पक्षे अधिकं बलं प्रदीयते। यस्याः अभ्यासिनः शिक्षकाः सन्त्येव। येन केवलं कक्षीये निश्चित्तिवातावरणे दीप्यमानस्य शिक्षोद्देश्यस्य प्राप्तिर्जायते।

2- पुस्तकीये सैद्धान्तिके च ज्ञाने बलम् - माध्यमिकाय शिक्षायै प्रवर्तमानायां पाठ्यचर्यायां विश्वविद्यालयीयायाः पाठ्यचर्याया प्रभावः सर्वत्र अन्वेष्टुं शक्यते। सर्वत्र सैद्धान्तिकं ज्ञाने बलः तै प्रदत्तः। येन ज्ञानैः सम्पृक्तास्सन् बालकाः प्रायशः व्यावहारिके जीवने असफलो भवति।

3- विषयाधिक्यस्य समस्या - प्रवर्तमानायाः पाठ्यचर्यायाः विकासः निर्माणञ्च विषयविशेषज्ञानां दृष्ट्या भवति। अस्यान्तर्गते अपेक्षाधिकानां विषयाणां स्थानानि भवति। विषयाधिक्यकारणात् बालकः तावद् रुचिं न प्रदर्श्य अवसादे पतति। वस्तुतस्तु अस्याः नियोजने काले छात्रणां रुचिः योग्यता आश्यकतादिषु तावद्ध्यानं न दीयते। एवञ्च परस्परं विषयेषु सम्बन्धस्थापनाय तावत् यत्नोऽपि न क्रियते।

4- जीवनेनासम्बद्धः - माध्यमिकशिक्षा इव माध्यमिकपाठ्यचर्यायाः जीवनेन सह न कश्चन तादृशः सम्बन्धः दरीदृश्यते येन बालकाः सभ्याः स्वस्थाः शिष्टाः तेजस्विनः यशस्विनश्च भवेयुः। विद्यालयात्मकस्य लघुसमाजस्य पृथग्रूपं तत्रैव समाजस्य पृथग्रूपं परिदृश्यते। येन विद्यालयात् बहिः समाजस्य यद्रूपमाभासितं भवति तस्मिन् सः त्वरियेन प्रदर्शयति।

5- वैयक्तिकभिन्नतायाः किमपि स्थानं नास्ति - जन्मादारभ्य मानवाः वैयक्तिकभिन्नतायाः स्वरूपं विस्तरेण स्पष्टं भवति। परञ्च प्रवर्तमाना पाठ्यचर्या वैयक्तिकभिन्नतां प्रति उपेक्षाभावं प्रदर्श्य सर्वेषां बालकनां कृते एका एव पाठ्यचर्या सुनिश्चिनोति।

6- व्यावसायिक्याः शिक्षायाः अभावः - प्रवर्तमानायां पाठ्यचर्यायां व्यावसायिक्यायाः शिक्षायाः तवती व्यवस्था न दृश्यमानाऽस्ति यावती भवितव्या। श्रमस्य महत्त्वं बालकाः स्वबोधनेनावगच्छेयुरेतदर्थं तस्यां शिक्षानीति 2020 इत्यस्या अनुगुणं व्यावसायिकशिक्षायारपि पाठ्यचर्या निर्मातव्या।

7- मूल्यशिक्षायाः अभावः - शिक्षाऽऽरभ्यैव सर्वेषु स्तरेषु या पाठ्यचर्या क्रियान्विता भवति तत्र भारतराष्ट्रस्य संरक्षणाय स्वाभ्युदयाय नूनमेव मूल्यशिक्षायाः समावेशः स्तरानुगुणं भवितव्यः। प्रौद्योगिकेऽस्मिन् युगे पतनं सर्वत्र त्वरियेन धारणं कठिनतरं परिदृश्यते। मूल्याभावे अनैतिकेषु कर्मसु बालकाः संलग्नाः भवन्ति।

8- प्रवर्तमाना पाठ्यचर्याऽपि परीक्षाकेन्द्रिता वर्तते - प्रवर्तमानायाः पाठ्यचर्यायाः एकमात्रमुद्देश्यं परिदृश्यते यत् औपचारिकपरीक्षायै योग्यतसम्पादनम्। एतदर्थं प्रायशः सर्वे शिक्षकाः परीक्षायामागम्यमानानां विषयवस्तूनामुपस्थापनं तेषामभ्यासे च संलग्नाः भवन्ति। येन बालकाः कस्यापि विषयस्य यथार्थज्ञानमवाप्तुमसमर्थो भवति।

9- लोकतन्त्रयऽयोग्या - प्रवर्तमानायां पाठ्यचर्यायां लोकतन्त्रीया दर्शनां प्रायशः अभावो दरीदृश्यते। येन स्तरानुगुणं बालकेषु लोकतन्त्रीयभावनायाः विकासो न भवति। अस्य सम्पोषिका पाठ्यचर्या भवितव्या।

वस्तुतस्तु पाठ्यचर्या तादृशी भवितव्य यस्याः साक्षात्सम्बन्धः बालकस्य सम्बद्धजीवनेन सह भवेत्। एवञ्च सा छात्रणां व्यक्तित्वस्य सर्वाङ्गीणविकासे सहयोगात्मिका स्यात्। सा वैयक्तिकभिन्नतानियमनेऽपि सक्षमा स्यात्। विद्यालयीयेन जीवनेन एवञ्च सामाजिकजीवनेन सह अस्याः साक्षात् सम्बन्धः भवितव्यः। कार्यनिष्पादनेन सह अवकाशकालस्य सदुपयोगेऽपि छात्रः भवेयुः। तथा च देशकालदशाञ्च परिदृश्य बालकानां वैयक्तिकामावश्यकतां पूरयितुं मानवकल्याणाय सन्मार्गप्रदर्शनाय च पाठ्यचर्या भवितव्या।

## सन्दर्भग्रन्थसूचि


1. शर्मा डॉ. आर.ए, शिक्षा अनुसन्धान, आर.लाल बुक डिपो मेरठ, वर्ष- 1992-93.
2. झा 'मणिः' डॉ. वाचस्पतिनाथः पाठ्यचर्या विद्यालयश्च, वीर बहादुर पब्लिकेशन, साउथ सीटी, राय बरेली रोड, लखनऊ-226025, वर्ष- 2016, संस्करण-प्रथम।
3. वर्मा डेंकेश्वर प्रसाद, ज्ञान पाठ्यचर्या व शिक्षण शास्त्र प्रथम वर्ष, राज्यशैक्षिक अनुसन्धान परिषद्, रायपुर, छत्तीसगढ़, वर्ष- 2021
4. झा 'मणिः, डॉ. वाचस्पतिनाथः, शिक्षामञ्जुषा, 'द्वितीयवर्षः पोद्दार पब्लिकेशन, तारानगर कालोनी, छित्तूपुर, बी.एच्.यू. वाराणसी-221005, वर्ष- 2019, संस्करण प्रथम।
5. ज्ञान एवं पाठ्यचर्या-शिक्षकशिक्षा विभाग, शिक्षाशास्त्र विद्याशांखा, उत्तराखण्ड मुक्त विश्वविद्यालय, हलद्वानी, उत्तराखण्ड।